# શ્રીવિદ્યાશઙ્કરપઞ્ચરત્નસ્તવઃ

Shri Vidyashankara PancharatnastavaH

sanskritdocuments.org

November 10, 2018

# Shri Vidyashankara PancharatnastavaH

# શ્રીવિદ્યાશઙ્કરપઞ્ચરત્નસ્તવઃ

## Sanskrit Document Information

Text title : vidyAshankarapancharatnastavaH

File name : vidyAshankarapancharatnastavaH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva, pancharatna

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીવિદ્યાશઙ્કરપઞ્ચરત્નસ્તવઃ

વિદ્યાશઙ્કર માં ત્વં વિદ્યાશં કુરુ સદૈવ કરુણાબ્ધે ।
વિદ્યા શં કુરુતે ખલુ વિદ્યા શઙ્કાં છિનત્તિ ચિત્તસ્થામ્ ॥ ૧॥

ચિન્તયતો હૃદયાબ્જે યોગીન્દ્રસ્યાસ્ય યોગબલાત્ ।
પુરતઃ પ્રાદુરભૂતાં કિં કરુણાબ્ધી ગિરીન્દ્રજાશમ્ભૂ ॥ ૨॥

સાલઙ્કારરમાપતેર્હૃદિ સદા ધ્યાનાત્કૃતાત્સાદરં
તાદાત્મ્યં કિમુ યોગિશેખર સમાપન્નોઽસિ નૂનં ગુરો ।
નો ચેદ્દૂરનિરસ્તસર્વવિભવસ્યાશામ્બરસ્યાપ્યહો
ચિત્રં ભૂષણજાલમાતતમિદં કસ્માત્સમાગાદ્વદ ॥ ૩॥

વિદ્યાતીર્થ કૃપામ્બુધે કલિમલપ્રધ્વંસનૈકવ્રત
પ્રજ્ઞાદાનસુદીક્ષિત પ્રણમતાં માં સર્વમિત્રૈર્યુતમ્ ।
પાહ્યમ્બ્વગ્નિનૃપાદિજન્યભયતસ્તદ્વચ્ચ રોગાદિતો
દત્ત્વાઽઽયુષ્યમરોગતાં ચ દૃઢતાં વિદ્યાં ચ લોકોત્તરામ્ ॥ ૪॥

વિદ્યાદાનનિબદ્ધદીક્ષ કરુણાવારાન્નિધે સદ્ગુરો
વિદ્યાતીર્થ મમાદિશસ્વ સુખદં યોગં દ્રુતં સિદ્ધિદમ્ ।
યસ્માચ્છીઘ્રમહં પ્રપદ્ય સકલાઃ સિદ્ધીશ્ચ વિદ્યાસ્તથા
સ્વાત્માનન્દનિમગ્નચિત્તસરસીજાતો ભવેયં સદા ॥ ૫॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતઃ શ્રીવિદ્યાશઙ્કરપઞ્ચરત્નસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*